# संस्कृत वार्ता:

**दिनाङ्क : 18/05/2026** **सायम् - 06:20**

**आदौ मुख्यवार्ता:**

- **प्रधानमन्त्री नरेन्द्रमोदी, प्रधानमन्त्री जोनास् गह् स्टोरे च ओस्लो-नगरे प्रतिबन्धित-प्रतिनिधि-स्तरीय-वार्तालापं कृतवन्तौ।**
- **काङ्ग्रेस् नेता वी.डी. सतीशनः अद्य प्रातः तिरुअनन्तपुरम्-नगरस्य केन्द्रीय-क्रीडाङ्गणे आयोजिते भव्य-समारोहे केरलम इत्यस्य नूतन-मुख्यमन्त्रीरूपेण शपथवचनं स्वीकृतवान्।**
- **पश्चिमबङ्ग-सर्वकारेण स्वस्य निर्वाचनस्य प्रतिज्ञानुसारम् कथित-संस्थागत-भ्रष्टाचारस्य, महिला-विरुद्धं अत्याचारस्य च अन्वेषणार्थं द्वौ अन्वेषण-आयोगौ निर्मितौ।**
- **स्वास्थ्य-परामर्शपत्रे उष्णतरङ्गस्य स्थितिं निवारयितुं आयुर्वेदादि विविध-आयुष-प्रणाल्याः पारम्परिक-स्वास्थ्य-निवारक-उपायाः अपि समाविष्टाः सन्ति।**
- **आई. पी. एल. क्रिकेट्-क्रीडायाम् अद्य आतिथेय-चेन्नई-सुपर-किङ्ग्स दलं, एम. ए. चिदम्बरम्-क्रीडाङ्गणे सनराईजर्स-हैदराबाद-दलं सम्मुखी करिष्यति।**

---------------------------------------------------------------------

**<u>नोर्वे मध्ये एव पी एम्</u>**

प्रधानमन्त्री नरेन्द्रमोदी, प्रधानमन्त्री जोनास् गह् स्टोरे च ओस्लो-नगरे प्रतिबन्धित-प्रतिनिधि-स्तरीय-वार्तालापं कृतवन्तौ। स्वच्छ-ऊर्जायाः, नील-अर्थव्यवस्थायाः, हरित-संक्रमणस्य च क्षेत्रेषु सहकारं वर्धयितुं महत्त्वपूर्णं सोपानं लक्ष्यीकृत्य, भारत-नार्वे-सम्बन्धं हरित-सामरिकसहभागित्वं प्रति उन्नतीकर्तुं उभावपि नेतारौ सहमतौ अभवताम्।

वार्तालापस्य समये नेतारौ द्वैपाक्षिकसम्बन्धानां सम्पूर्णक्षेत्रस्य समीक्षाम् अकुरुताम्

---------------------------------------------------------------------

**<u>प्रधानमन्त्रिणः स्वीडन्-भ्रमणम्</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य स्वीडन्-देशस्य द्विदिवसीया यात्रा समापिता। स्वीडन्-देशस्य प्रवासे अनेकानि महत्त्वपूर्णानि परिणामानि प्राप्तानि, येन द्वैपाक्षिकसम्बन्धेषु नूतना गतिः प्राप्ता इति श्रीमोदिना सामाजिकान्तर्जालीय-पटले उक्तम्। सः अवदत् यत्, तेषां द्वैपाक्षिक उपबन्धान् व्यूहात्मकसहभागित्वं प्रति उन्नतीकरणात् आरभ्य, संयुक्त-नवान्वेषणसहभागित्वम् इत्यस्य द्वितीयो भाग: अथ भारत-स्वीडन्-प्रौद्योगिकी, कृत्रिम-बुद्धिमत्ता-मार्गस्य आरम्भात् आरभ्य, आगामिषु पञ्चवर्षेषु द्वैपाक्षिकव्यापारं द्विगुणीकरणस्य लक्ष्यम् अभवदिति । सः स्वीडन्-देशस्य जनेभ्यः, स्वीडन्-देशस्य सर्वकाराय, प्रधानमन्त्री उल्फ क्रिस्टरसन इत्यस्मै च स्नेहाभिवर्षणाय धन्यवादभावान् प्रायच्छत्। अग्रिमेषु पञ्चवर्षेषु द्वैपाक्षिक-आर्थिक-विनिमयं द्विगुणीकर्तुं, "मेक् इन् इण्डिया" "मेड् विद् स्वीडन्" इत्येतयोश्च उपक्रमयोः, विशेषतः हरित-हाइड्रोजन्, सेमिकण्डक्टर्स्, उन्नत-विनिर्माणम् इत्यादिषु क्षेत्रेषु सहकारं सुदृढीकर्तुं समग्र-मार्गचित्रस्य लक्ष्यम् अस्तीति सः प्रावोचत्।

---------------------------------------------------------------------

**केरलम-मन्त्रिणः**

काङ्ग्रेस् नेता वी.डी. सतीशनः अद्य प्रातः तिरुअनन्तपुरम्-नगरस्य केन्द्रीय-क्रीडाङ्गणे आयोजिते भव्य-समारोहे केरलम इत्यस्य नूतन-मुख्यमन्त्रीरूपेण शपथवचनं स्वीकृतवान्। राज्यपालः राजेन्द्र विश्वनाथ आर्लेकरः श्रीसतीशनं पदस्य गोपनीयतायाः च शपथं कारितवान्। मुख्यमन्त्रिणा सह एकविंशतिः सदस्याः मन्त्रिपरिषदः कार्यभारं स्वीकृतवन्तः। अस्मिन् कार्यक्रमे काङ्ग्रेस्-पक्षस्य अध्यक्षः मल्लिकार्जुन खरगे, कांग्रेस-दल-नेता राहुलगान्धी, कर्णाटकस्य मुख्यमन्त्री सिद्धारमैया, तेलङ्गाना-राज्यस्य मुख्यमन्त्री रेवन्त रेड्डी, हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिङ्घ् सुखुः, केरलस्य भाजपा-पक्षस्य राज्य-अध्यक्षः राजीव चन्द्रशेखरादयः नेतारः उपस्थिताः आसन्। शपथग्रहणसमारोहानन्तरं, नवनिर्मितः सर्वकारः अद्य स्वस्य प्रथमं आधिकारिकं मन्त्रिमण्डलीयोपवेशनम् आहूतवान्।

---------------------------------------------------------------------

**डब्ल्यूबी-प्रश्न आयोगः**

पश्चिमबङ्ग-सर्वकारेण स्वस्य निर्वाचनस्य प्रतिज्ञानुसारम् कथित-संस्थागत-भ्रष्टाचारस्य, महिला-विरुद्धं अत्याचारस्य च अन्वेषणार्थं द्वौ अन्वेषण-आयोगौ निर्मितौ। मुख्यमन्त्री सुवेन्दु अधिकारी अद्य राज्यमन्त्री मण्डलस्य अनुमोदनानन्तरम् अस्य निर्णयस्य घोषणां कृतवान्।

---------------------------------------------------------------------

**अमित शाहस्य छत्तीसगढ़ यात्राः**

केन्द्रीय-गृह-सहकारिता च मंत्री अमितशाहः अद्य रायपुरे राज्य- स्तरीय - कार्यक्रमे 'अत्याधुनिक - डायल वन – वन - टू इति आपत्कालीन-प्रतिक्रिया-वाहनानां, आधुनिक-फॉरेन्सिक्-मोबाईल-यानानाञ्च ध्वजप्रदर्शनपूर्वकं शुभारम्भं कृतवान्। राज्यस्य विभिन्नेषु

मण्डलेषु नियोजनार्थं अद्य आहत्य चतुश्शत नूतनो-न्नता-पत्कालीन-वाहनानि लोकार्पितवान्। अस्मिन् अवसरे मुख्यमन्त्री विष्णुदेव साई, उपमुख्यमन्त्री विजयशर्मा, छत्तीसगढविधानसभाध्यक्षः रमणसिङ्घश्च उपस्थिताः आसन्।

---------------------------------------------------------------------

**सरकार- पश्चिम एशिया ब्रीफ़ः**

सर्वकारः अवदत् यत् देशे तैलेन्धन-शोधनागाराणि सामान्यरूपेण कार्यं कुर्वन्ति, भारते च वार्तमानिक-पश्चिम-एशिया-सङ्कटेन आयात-बाधायाः अनन्तरम् अपि पर्याप्तानि अशोधितैन्धनभण्डाराणि सन्तीति। पश्चिम-एशियायाः साम्प्रतिक-स्थिति-विषये अद्य नवदेहली-नगरे अन्तर्मन्त्रालयीयं विवरणं प्रायच्छन् पेट्रोलियम-प्राकृतिकग्यास्-मन्त्रालयस्य संयुक्तसचिवपदासीना सुजाता शर्मा इत्येषा अवदत् यत् देशे पेट्रोल्, डीज़ल्, एल्. पी. जी. प्राकृतिकग्यास्-इत्येतेषां पर्याप्त-भण्डारम् अस्तीति।

---------------------------------------------------------------------

**पश्चिमबङ्ग मंत्रिमंडल**

पश्चिमबङ्ग-सर्वकारस्य मन्त्रिपरिषद् विभिन्नेभ्यः सर्वकारीय-सेवारतेभ्यः, अन्येभ्यः राज्य-अनुदान-प्राप्त-संस्थानां, विद्यालयानां च कर्मचारिभ्यश्च सप्तम-वेतन-आयोगस्य निर्माणाय सिद्धान्ततः अनुमोदनं दत्तवान्। राज्यस्य महिलाभ्यः जून-मासस्य एक दिनाङ्कतः अन्नपूर्णा-योजना प्रवर्तिता भविष्यति, यस्यान्तर्गतं त्रिसहस्र- रूप्यकाणि निर्देश-लाभ-हस्तान्तरणं भविष्यति। कोलकाता-उच्चन्यायालयस्य सद्यः कृत-निर्णयानन्तरं राज्यसर्वकारेण बङ्गालस्य ओ. बी. सीति अन्यवञ्चितवर्गीया सूचिः नूतनरूपेण सज्जी करिष्यते ।

---------------------------------------------------------------------

**उत्तर प्रदेश मंत्रिमंडल**

उत्तरप्रदेशे, अद्य योगी आदित्यनाथ इत्यस्य मन्त्रिमण्डलेन ओ. बी. सी. आयोगस्य संविधानम् अनुमोदितम्। पञ्चायत-निर्वाचनेषु अन्या-नुन्नत-वर्गस्य आरक्षणस्य कार्यान्वयनार्थं आयोगस्य अनुशंसा सर्वोच्चन्यायालयस्य पूर्वसङ्कल्पः अस्ति। मुख्यमन्त्री योगी आदित्यनाथस्य नेतृत्वे अद्य मन्त्रिमण्डलेन आगरा-लखनऊ-नगरयोः मेट्रो-विस्ताराय, मिर्जापुर्-नगरे एकोनाष्टाविंशतिशतं कोटिरूप्यकाणां पॉवर-ग्रिड् इत्यस्य उन्नयनाय, आर्. एम्. एल्. इत्यत्र सार्धाष्टशतं कोटिरूप्यकाणां चिकित्सालय-सङ्कुलाय च अनुमतिः प्रदत्ता।

---------------------------------------------------------------------

**एन्. ए. डी. डी. ए-डी. जी. डब्ल्यू. एच्. ओः**

केन्द्रीय-स्वास्थ्य-परिवार-कल्याण-मन्त्री-जगत्-प्रकाश्-नड्डाः स्विट्ज़रलैण्ड् - देशस्य जिनेवा-नगरे आयोजिते ऊनाशितितमे विश्व-स्वास्थ्य-सभायाः अनन्तरं विश्व-स्वास्थ्य-सङ्घटनस्य महानिदेशकेन सह मिलितवान्। सामाजिक-पटले स्वास्थ्य-मन्त्रालयेन उक्तं यत्, श्रीनड्डाः पुनः दृढीकृतवान् यत् वैश्विक-स्वास्थ्य-समता प्रवर्तयितुं भारतस्य प्रतिबद्धता अस्तीति।

---------------------------------------------------------------------

**आयुष-परामर्श-स्वास्थ्यः**

आयुष्-मन्त्रालयः अद्य वर्तमान-ग्रीष्मकालाय अत्यधिक-उष्णतया सह उष्णतरङ्गस्य च विषये विस्तृतं सार्वजनिक-स्वास्थ्य-परामर्शं प्राकाशयत्। परामर्शत्वेन मन्त्रालयेन उक्तं यत् पर्याप्ततया जलग्रहणंणं, व्यस्ततायामपि सूर्यप्रकाशस्य प्रत्यक्ष-संसर्गात् निवारणं, विद्युद्विश्लेष्यैः समृद्धानां ऋतुकालिकफलानां द्रवाणाञ्च सेवनं करणीयमिति प्राकथयत्।

---------------------------------------------------------------------

**आयुष-परामर्शः**

स्वास्थ्य-परामर्शपत्रे उष्णतरङ्गस्य स्थितिं निवारयितुं आयुर्वेद, सिद्ध, योग, युनानी, होम्योपैथी इत्यादीनां विविध-आयुष-प्रणाल्याः पारम्परिक-स्वास्थ्य-निवारक-उपायाः अपि समाविष्टाः सन्ति।

---------------------------------------------------------------------

**गोयल-व्यपार-महोत्सवः**

केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष-गोयलः अवदत् यत् वैश्विक-समस्याभिः सह अनिश्चिततासु अपि भारतं द्रुतगत्या प्रगतिं कुर्वदस्ति। अद्य नवदिल्ल्यां भारत-व्यापार-महोत्सवस्य अन्तर्जालीयपटलस्य उद्घाटने श्री गोयलः अग्रे गन्तुं उत्साहः कदापि न न्यूनीभवति तथा च सर्वे अविरामं कार्यं कुर्वन्तु इति उक्तवान्।

---------------------------------------------------------------------

**राजनाथ-भ्रमणम्**

रक्षामंत्री राजनाथसिंहः अद्य वियतनाम-दक्षिणकोरिया-देशयोः यात्रायामस्ति, सः वियतनामदेशस्य हनोई इत्यत्र सम्प्राप्तवान्। वियतनाम-देशस्य प्रवासावधौ राजनाथसिंहः वियतनाम्-देशस्य राष्ट्रिय-रक्षामन्त्रिणा जनरल् फान् वान् जियाङ्ग् इत्यनेन सह द्वैपाक्षिकं वार्तालापं करिष्यति।

सामाजिकान्तर्जालीये पटले मन्त्री अवदत् यत् सः द्वैपाक्षिक-सम्बन्धानां व्याप्तिम् अधिकं विस्तारयितुम् उभयोः देशयोः भ्रमणार्थं उत्सुकः अस्तीति। सः अवदत् यत्, सामरिकसैन्यसहयोगस्य गहनता, रक्षा-औद्योगिकसहभागित्वस्य सुदृढीकरणम्, समुद्रीयसहयोगस्य सम्वर्धनम्, भारत-प्रशान्तक्षेत्रे शान्तेः स्थिरतायाः च प्रोत्साहनं अस्य केन्द्रबिन्दुः भविष्यति।

---------------------------------------------------------------------

**आई. पी. एल. क्रिकेट्ः**

आई. पी. एल. क्रिकेट्-क्रीडायाम् अद्य आतिथेय-चेन्नई-सुपर-किङ्ग्स दलं, एम. ए. चिदम्बरम्-क्रीडाङ्गणे सनराईजर्स-हैदराबाद-दलं सम्मुखी करिष्यति। क्रीडायाः आरम्भः सायं सार्द्ध सप्तवादने भविष्यति। गतरात्रौ दिल्ली कैपिटल्स दलेन राजस्थान-रायल्स-दलं पञ्च स्तोभैः पराजितम्। अन्यस्यां स्पर्धायां, धर्मशाला-नगरे रॉयल चैलेंजर्स बेंगलूरु दलेन पञ्जाब्-किङ्ग्स्-दलं त्रयोविंशति धवानांकैः पराजितम्।

**।। इति वार्ता: ।।**